Sample Paper
&
Question Paper Pattern

2023
2024

GOA BOARD

aglasem.com

SYLLABUS AND PORTION DISTRIBUTION

FIRST FORMATIVE EXAM	
पठित (०८ गुणाः)	गद्य - १)सुविचार्य विधातव्यम् २)चन्द्रनाथपर्वतः ३) अहं माण्डवी
	पद्य - १)सुभाषितानि
अपठित (०३ गुणाः)	पद्यखण्डाधारितप्रश्नान् उत्तरत |
व्याकरण (०५ गुणाः)	लट्,लङ्,लृट्,लोट्,लकाराः शब्दरूपाणि –देव,मुनि, भानु,पितृ, नदि, मति, मातृ,वन तथा च पाठे आगतानि शब्दरूपाणि सन्धिः समसाः – विभक्ति तत्पुरुषः, द्वन्द्वः,नञ् तत्पुरुषः, कर्मधारयः क्त्वान्त,तुमन्त,ल्यबन्त अव्ययपदानि
रचना (०४)	सार्थकवाक्यलेखनम् संवादपूर्तिः

SECOND FORMATIVE EXAM	
पठित (०८ गुणाः)	गद्य- १)त्रिवर्णः ध्वजः २)चन्द्रनाथपर्वतः ३) गोमन्तभूषणं श्रीमान् भाऊसाहेब बान्दोडकरः
	पद्य - १)काव्यशास्त्रविनोदः
अपठित (०३ गुणाः)	गद्यखण्डस्य अनुवादः |
व्याकरण (०५ गुणाः)	आत्मनेपद धातोः- लट् , लङ् लकाराः शब्दरूपाणि – मरुत्, भगवान्, राजन्, करिन्, वारि तथा च पाठे आगतानि शब्दरूपाणि प्रश्ननिर्माणम् सन्धिः समसाः – उपपदतत्पुरुषः, द्विगुः, अव्ययीभावः,बहुव्रीहिः
रचना (०४)	घटनाक्रमः निबन्धलेखनम्

schools.aglasem.com
aglasem.com

FINAL EXAM	
पठितम् (३२ गुणाः)	गद्य :- ➢ सुविचार्य विधातव्यम् ➢ चन्द्रनाथपर्वतः ➢ अहं माण्डवी ➢ त्रिवर्णः ध्वजः ➢ प्रतिज्ञापूर्तिः ➢ गोमन्तभूषणम्- श्रीमान् भाऊसाहेब बान्दोडकरः ➢ उपायेन हि शक्यम् ➢ गोमन्तकीयं लोकजीवनम्
	पद्य :- ➢ सुभाषितानि ➢ काव्यशास्त्रविनोदः ➢ नीतिश्लोकाः ➢ वाचनप्रशंसा
अपठितम् (१६ गुणाः)	➢ गद्यखण्डस्य अनुवादः | ➢ गद्यखण्डाधारितप्रश्नाः | ➢ पद्यखण्डाधारितप्रश्नाः |
व्याकरणम् (२० गुणाः)	➢ लकाराः – परस्मैपद - लट्, लृट्,लङ्,लोट् आत्मनेपद – लट्, लङ ➢ शब्दरूपाणि – देव,मुनि,माला, नदी,वन,मातृ,पितृ, शशिन्,सरित्, पयस्,भगवत्, राजन्,वारि इत्यादीनि तथा च पाठे आगतानि शब्दरूपाणि | ➢ सर्वनामरूपाणि - तत्,एतत्,अस्मद्,युष्मद्,सर्व,इदम् इत्यादीनि तथा च पाठे आगतानि सर्वनामानि | ➢ धातुरूपाणि – या,दा, पा, कृ इत्यादीनि तथा च पाठे आगतानि क्रियापदानि | ➢ कारकविभक्तयः ➢ उपपदविभक्तयः ➢ वाक्यपरिवर्तनम् ➢ प्रश्ननिर्माणम् ➢ पर्यायपदलेखनम् ➢ विलोमपदलेखनम् ➢ सङ्ख्याविशेषणानि ➢ क्रमवाचकसङ्क्याः ➢ धातुसाधितविशेषणानि ➢ सन्धिः ➢ समसाः (विभक्तितत्पुरुषः,कर्मधारयः,द्विगुः,द्वन्द्वः,बहुव्रीहिः,अव्ययीभावः,उपपदतत्पुरुषः,नञतत्पुरुषः) ➢ अव्ययपदानि- क्त्वान्तम्,तुमन्तम्,ल्यबन्तम् ➢ वाक्यशुद्धिः ➢ स्म अव्ययं योजयत/ निष्कासयत |

schools.aglasem.com
aglasem.com

रचना (०८ गुणाः)	सार्थकवाक्यनिर्माणम् कथापूर्तिः / संवादपूर्तिः घटनाक्रमः निबन्धलेखनम् / चित्रवर्णनम्

Suggested Topics For The Assignments

१) २० सार्थसुभाषितानां लेखनम् |

२) पञ्च शब्दनां रूपलेखनम् |

३) पञ्च संस्कृतकवीनां कार्यविषये लेखनम् |

४) चतुर्णां संस्कृतसाहित्यकाराणां कार्यविषये लेखनम् |

५) विषयद्वयम् अधिकृत्य निबन्धलेखनम् – स्थलवर्णनम्, प्रियः उत्सवः, प्रियः,नेता, संस्कृतभाषा इत्यादीनि

६) पञ्च चित्राणि स्वीकृत्य प्रतिचित्रं पञ्चवाक्यानां लेखनम् |

aglasem.com
schools.aglasem.com
aglasem.com

BLUE - PRINT

FINAL S.S.S. EXAM 2023-24

SUB- SANSKRIT (T.L) **Maximum Marks - 80** **Duration - 2½ hrs**

Q.No	Objectives	KNOWLEDGE				UNDERSTANDING				Application				SKILL				TOTAL
	Form of Questions	VSA	SA-I	SA-II	LA	VSA	SA-I	SA-II	LA	VSA	SA-I	SA-II	LA	VSA	SA-I	SA-II	LA	
	Content																	
१	Prose & Poetry						1(2)											1(2)
२							1(2)											1(2)
३						1(1)												1(1)
४							1(2)											1(2)
५						1(1)												1(1)
६						1(1)												1(1)
७						1(1)												1(1)
८									1(4)									1(4)
९							1(2)											1(2)
१०							1(2)											1(2)
११							1(2)											1(2)
१२		1(1)																1(1)
१३		1(1)																1(1)
१४		1(1)																1(1)
१५		1(1)																1(1)
१६			1(2)															1(2)
१७			1(2)															1(2)
१८			1(2)															1(2)
१९		1(1)																1(1)
२०		1(1)																1(1)
२१	Non- Texual						1(2)											1(2)
२२							1(2)											1(2)
२३						1(1)												1(1)
२४						1(1)												1(1)
२५						1(1)												1(1)

schools.aglasem.com

aglasem.com

२६						1(1)												1(1)
२७						1(1)												1(1)
२८								1(3)										1(3)
२९	Grammer									1(1)								1(1)
३०										1(1)								1(1)
३१										1(1)								1(1)
३२										1(1)								1(1)
३३										1(1)								1(1)
३४										1(1)								1(1)
३५										1(1)								1(1)
३६										1(1)								1(1)
३७										1(1)								1(1)
३८										1(1)								1(1)
३९										1(1)								1(1)
४०										1(1)								1(1)
४१										1(1)								1(1)
४२										1(1)								1(1)
४३		1(1)																1(1)
४४		1(1)																1(1)
४५		1(1)																1(1)
४६		1(1)																1(1)
४७										1(1)								1(1)
४८										1(1)								1(1)
४९																	1(4)	1(1)
५०	Composition																1(4)	1(4)
५१																	1(4)	1(4)
५२																	1(4)	1(4)
No. of questions		10	3	0	0	9	8	1	1	16	0	0	0	0	0	0	4	52
Marks		10	6	0	0	9	16	3	4	16	0	0	0	0	0	0	16	0
Toatal Marks		16				32				16				16				80

schools.aglasem.com

aglasem.com

DESIGN OF THE QUESTION PAPER

1.Weightage to Learning Outcomes :

Sr.No	Learning Outcomes	Marks	Percentage of Marks
1	Knowledge	16	20
2	Understanding	32	40
3	Application	16	20
4	Skill	16	20
Total		80	80

2.Weightage to Content / Subject Units :

Sr.No	Units	Marks
1	Prose	21
2	Poetry	11
3	Non Textual	12
4	Grammer	20
5	Composition	16
Total		80

3.Weightage to Forms of Questions :

Sr.No	Form of Questions	Marks for each question	Number of questions	Total Marks
1.	Long Answer Type (LA)	04	05	20
2.	Short Answer Type (SA-I)	02	11	22
3.	Short Answer Type (SA-II)	03	01	03
4.	Very Short Answer Type (VSA)	01	35	35
Total				80

schools.aglasem.com
aglasem.com

The expected time for different types of questions would be as follows:

Sr.No	Form of Questions	Approx. time for each question in mins (t)	Number of questions (n)	Approx. time for each form of questions in mins (n x t)
		09 ½	05	47.5
2.	Short Answer Type (SA-I)	04	11	44
3.	Short Answer Type (SA-II)	06	01	06
4.	Very Short Answer Type (VSA)	1 ½	35	52 ½
Total				150

4. Weightage to Difficulty level of question :

Sr.No	Estimated difficulty level of question	Percentage
1	Easy	20%
2	Average	60%
3	Difficult	20%

schools.aglasem.com

aglasem.com

MODEL QUESTION PAPER PATTERN

SUBJECT - SANSKRIT (T.L)

FIRST FOMATIVE EXAM MODEL QUESTION PAPER PATTERN 2023-2024

STD – X SUB – SANSKRIT (Third Language)

MARKS – 20 DURATION – 1hr.

==

(प्रथमखण्डः पठितावबोधनम् – ०८ गुणाः)

प्र.१.क)अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत | (३)

१)एकवाक्येन उत्तरत |-२-

२)व्याकरण-आधारितप्रश्नः | (पर्यायपदम् / विलोमपदम्)-१-

ख)एकं सुभाषितं पूर्णं,शुद्धं च लिखत | (२)

ग)एकस्य गद्यखण्डस्य अनुवादं स्वभाषया लिखत | (२)

घ)कः कं प्रति अवदत् इति लिखत |(एकम्) (१)

(द्वितीयखण्डः – अपठितावबोधनम् -०३ गुणाः)

प्र.२.च)अधस्तनं पद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत | (०३)

(तृतीयखण्डः- व्याकरणम्- ०५ गुणाः)

प्र.३.ट)रिक्तस्थानेषु उचितानि पदरूपाणि कोष्ठकात् चित्वा वाक्यं पुनः लिखत | (२)

ठ)सन्धिं कुरुत | (एकम्) (१)

ड)तालिकायां रिक्यस्थानेषु समस्तपदम्/विग्रहम्/समासनाम वा लिखत | (एकम्) (१)

ढ)सूचनानुसारं अव्ययं लिखत | (१)

(चतुर्थखण्डः – रचना- ०४ गुणाः)

प्र.४. त)कोष्ठकात् उचितपदानि चित्वा सार्थकवाक्यानि लिखत | (४)

अथवा

त)मञ्जूषायां दत्तपदानां साहाय्येन संवादपुर्तिं कृत्वा कथां पुनः लिखत | (४)

==

schools.aglasem.com

aglasem.com

SECOND FOMATIVE EXAM MODEL QUESTION PAPER PATTERN 2023-2024

STD – X SUB – SANSKRIT (Third Language)

MARKS – 20 DURATION – 1hr.

==

(प्रथमखण्डः पठितावबोधनम् – ०८ गुणाः)

प्र.१.क)अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत | (३)

१)एकवाक्येन उत्तरत |-२-

२)व्याकरण-आधारितप्रश्नः | (पर्यायपदम् / विलोमपदम्) -१-

ख)एकस्य सुभाषितस्य अनुवादं स्वभाषया लिखत | (२)

ग)प्रश्नस्य उत्तरम् स्वभाषया लिखत (एकम्) | (२)

घ)कः कं प्रति अवदत् इति लिखत |(एकम्) (१)

(द्वितीयखण्डः – अपठितावबोधनम् -०३ गुणाः)

प्र.२.च)एकस्य गद्यखण्डस्य स्वभाषया अनुवादं लिखत | (३)

(तृतीयखण्डः- व्याकरणम्- ०५ गुणाः)

प्र.३. ट) सूचनानुसारं वाक्यपरिवर्तनं कृत्वा वाक्यं पुनः लिखत | (केवलं द्वयम्) (२)

ठ)सन्धिविग्रहं कुरुत | (एकम्) (१)

ड)तालिकायां रिक्यस्थानेषु समस्तपदम्/विग्रहम्/समासनाम वा लिखत | (एकम्) (१)

ढ)रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कृत्वा वाक्यं पुनः लिखत | (१)

(चतुर्थखण्डः – रचना- ०४ गुणाः)

प्र.४.त)अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत | (४)

अथवा

त)कमपि एकं विषयं अधिकृत्य अष्ट वाक्यानि लिखत | (४)

==

schools.aglasem.com

aglasem.com

MODEL QUESTION PAPER PATTERN FOR THE FINAL EXAM 2023-2024

STD – X　　　　SUB – SANSKRIT (Third Language)

MARKS – 80　　　　DURATION - 2½ hrs

==

- **अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत |**

अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन जयद्रथाय रक्षणं प्रतिश्रुतम्| द्रोणाचार्योऽपि रक्षणार्थं प्रार्थितः|तेन शकटव्यूहः रचितः |एवं युद्धे प्रवर्तमाने सूर्यास्तसमयः आसन्नप्रायो जातः| श्रीकृष्णोऽर्जुनमवदत्-“जयद्रथस्तु धनुर्धरैराच्छादितः|अहं मायया सूर्यबिम्बमाच्छादयामि | तथा कृते सति जयदथः स्वयमेव बहिरागच्छति| त्वं च तं जहि | श्रीकृष्णेन सर्वत्र अन्धकारः कारितः सुदर्शनचक्रेण |सूर्यास्तः सञ्जातः इति सर्वे अमन्यन्त |

प्रश्नाः

१)अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन किं किं कृतम् ? (दशपदैः उत्तरत) (२)

२) श्रीकृष्णः सुदर्शनचक्रेण किं कृतवान् ? (दशपदैः उत्तरत) (२)

३)` रणे` इति पदस्य पर्यायवाचिपदं लिखत | (१)

- **अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत |**

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय |
　　खलस्य साधोर्विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय ||
वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् |
　　वार्धके दुःखहरणं हितं सद्ग्रन्थवाचनम् ||

प्रश्नाः

४)खलः विद्यायाः शक्तेः च उपयोगं किमर्थं करोति ? (दशपदैः उत्तरत) (२)

५)‘ शीलरक्षकम् ’ इत्यस्य समासविग्रहं कृत्वा लिखत | (१)

- **अधस्तनवाक्यानि कः कं प्रति अवदत् तत् लिखत |**

६) “देव ! दृष्टिप्रसादं कुरु | ” (१)

७) “भवत्सकाशात् वयं गोमन्तकस्य लोकजीवनविषये ज्ञातुमुत्सुकाः” | (१)

schools.aglasem.com
aglasem.com

➢ **एकस्य गद्यखण्डस्य स्वभाषया अनुवादं कृत्वा लिखत |** (४)

८)ज्ञानेशः- विस्तीर्णः समुद्रतटः मत्स्यव्यवसायिकानां कृते महत्वपूर्णः |माण्डवी – जुवारीनद्यौ लोकजीवनाय महत्वपूर्णं योगदानं यच्छतः |

राधा - प्रारम्भिककाले लोकजीवनाय उपकारकः खनिजव्यवसायः अद्य गोमन्तकस्य पर्यावरणाय तथा लोकजीवनाय चिन्ताविषयः सञ्जातः | पर्यटनव्यवसायः अपि विदेशीयानां देशीयानां च दुर्व्यवहारैः लोकजीवनाय हानिकारः जातः इति दृश्यते |

अथवा

८) पर्वतशिखरस्य अधः ‘ थळ’ इति स्थानमस्ति, यत्र पूर्वम् अनेके सङ्गीतोपासकाः अखण्डतया सङ्गीतसाधनया शिवाराधनां कुर्वन्ति स्म | शिखरप्रदेशे बृहत्कृष्णशिलामध्ये ‘ चन्द्रेश्वर’ नाम्ना प्रसिद्धं शिवलिङ्गं विलसति | चन्द्रेश्वरस्य दक्षिणे कोणे भूतनाथशिला अस्ति | तस्याः अग्रभागे एकं लघुवातायनमस्ति | तस्मात् भूतनाथः चन्द्रेश्वरदर्शनं करोति इव दृश्यते |

➢ **<u>एकस्य</u> सुभाषितस्य अनुवादं स्वभाषया लिखत |** (२)

९)वैद्यराज नमस्तुभ्यं यमराजसहोदर |
यमो हि हरति प्राणान् त्वं तु प्राणान् धनानि च ||

अथवा

९)चिन्तनीया हि विपदामादावेव प्रतिक्रिया |
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ||

➢ **प्रश्नानां उत्तराणि स्वभाषया लिखत |**

१०)भाऊसाहेब बान्दोडकरस्य कार्यविषये लिखत ? (२)

अथवा

१०) ‘ धोण्ड ’ इति नाम्ना प्रसिद्धाः जनाः व्रतं कथम् आचरन्ति ? (२)

११) माधवः नन्दिन्याः सेवां कथं कृतवान् ? (२)

अथवा

११)माण्डवीनदी जनानां जीवनदायिनी अस्ति इति सुस्पष्टयत ? (२)

schools.aglasem.com
aglasem.com

- **प्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया उत्तरत |**

१२)मालतीमाधवौ कुम्भकारगृहात् कति घटान् क्रीतवन्तौ ? (१)

१३)त्रिवर्णध्वजे के त्रयः वर्णाः सन्ति ? (१)

१४)चन्द्रेश्वरपर्वते के प्रसिद्धाः उत्सवाः प्रचलन्ति ? (१)

१५)भाऊसाहेब बान्दोडकरस्य जन्मदिनं कदा अस्ति? (१)

- **सुभाषितानि पूर्णानि, शुद्धानि च लिखत |**

१६)शतेषु---|| (२)

१७)कृपणेन--|| (२)

१८)मनुजा---|| (२)

- **वाक्यांशयोः मेलनं कृत्वा लिखत |**

१९)डिचोलीभागः (१) २०)पेडणेभागः (१)	➢ गृहनिर्माणकलायां प्रसिद्धः ➢ मृद्-धातुवस्तुनिर्माणे प्रसिद्धः ➢ संगीतनाट्यादिकलासु प्रसिद्धः

- **अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतभाषया उत्तरत |**

कविकुलशिरोमणिः महाकविः कालिदासः नृपतेः विक्रमादित्यस्य सभायां विद्यमानेषु 'नवरत्नेषु' एकतमः आसीत् |सः कालिमातुः भक्तः आसीत् | तस्याः प्रसादेन सः महाकविः अभवत् | तेन कुमारसम्भवम्,रघुवंशम् च इति द्वे महाकाव्ये ऋतुसंहार-विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलम् च त्रीणि नाटकानि विरचितानि | तस्य शाकुन्तलनाटकं पठित्वा गटेनामा जर्मन् कविः तद् नाटकं मस्तके धृत्वा सानन्दम् अनृत्यत् |

२१)कालिदासेन कानि त्रीणि नाटकानि रचितानि ? (दशपदैः उत्तरत) (२)

२२) कालिदासः कस्य सभायाः नवरत्नेषु एकतमः आसीत् ? (दशपदैः उत्तरत) (२)

२३)परिच्छेदात् एकं क्त्वान्त अव्ययं चित्वा लिखत | (१)

२४) सः महाकविः अभवत् – वाक्यं बहुवचने लिखत | (१)

schools.aglasem.com

aglasem.com

➢ **अधस्तनं पद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि एकवाक्येन <u>संस्कृतभाषया</u> लिखत |**

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् |
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ||
गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात् |
स्थितिरुच्चैः पयोदानां पयोधीनामधस्थितिः |

प्रश्नाः

२५) पयोधीनां स्थितिः कुत्र भवति ? (१)

२६) दुर्जनेन समं किं न कारयेत् ? (१)

२७) कस्य कृते गेहम् तृणवत् भवति ? (१)

अधोलिखितयोः परिच्छेदयोः एकस्य अनुवादं स्वभाषया लिखत| **(३)**

२८)एकदा महाराजस्य दशरथस्य निकटं गत्वा विश्वामित्रमहर्षिः प्रार्थितवान्- "राजन्! मया कश्चित् यागः प्रचाल्यते | तस्मिन् विघ्नोत्पादने निरताः सन्ति राक्षसाः |तेषां निवारणार्थं रामलक्ष्मणौ अपेक्ष्येते | तयोः नयनार्थं आगतः अस्मि "

अथवा

२८)अञ्जनी – सखि! पश्यतु भोः! तत्र किमपि पतितम् अस्ति |

श्रेया – किं तत्र |

अञ्जनी – पश्याम ,आगच्छतु |

श्रेया – अहो धनस्यूतः |

अञ्जनी – एषः कस्य धनस्यूतः स्यात् ?

श्रेया – कः जानाति ?

अञ्जनी – स्यूते किम् अस्ति पश्यतु भोः|

श्रेया – हन्त ! बहु धनम् अस्ति भोः | पश्यतु |

अञ्जनी – सत्यं भोः ! कति रूप्यकाणि सन्ति |

schools.aglasem.com

➢ **अधोलिखितवाक्येषु रिक्तस्थानानि पूरयितुं योग्यं पदं चिनुत |**

२९)----------प्रति सन्देशं प्रेषयतु | (१)

- रामाय
- रामं
- रामे
- रामात्

३०)----------आम्रं रोचते | (१)

- रमायां,
- रमायाः
- रमायै
- रमां

३१)ध्वजः--------प्रकम्पमानः भवति | (१)

- मरुत्
- मरुते
- मरुतः
- मरुता

३२)पणजीनगरे -------- प्रदर्शिनी आयोजिता आसीत् | (१)

- विशालस्य
- विशाला
- विशालं
- विशालः

३३)सर्वे पाण्डववीराः अवदन् | (वाक्यं लृटलकारे लिखत) (१)

अथवा

३३)गृहे ४ बालकाः सन्ति | (सङ्ख्यास्थाने सङ्ख्यावाचिपदं लिखत) (१)

३४)हस्ती महापङ्कस्य बहिः गन्तुम् असमर्थः अभवत् | (वाक्यं संशोध्य लिखत) (१)

अथवा

३४)पर्वते जलप्रवाहाः आसन् | (वाक्यं एकवचने लिखत) (१)

schools.aglasem.com

aglasem.com

➢ **रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत |**

३५)मालती <u>पितुः</u> गृहात् प्रत्यावर्तत | (१)

३६)कर्पूरतिलकः <u>राज्यलोभाकृष्टः</u> आसीत् | (१)

➢ **तालिकायां रिक्यस्थानेषु समस्तपदम्/विग्रहम्/समासनाम वा लिखत |**

समस्तपदम्	विग्रहः	समासनाम	
३७)दृष्टिप्रसादः	------------------	कर्मधारयः	(१)
३८)-----------	वर्षे वर्षे	अव्ययीभावः	(१)
३९) कुम्भकारः	कुम्भं करोति	--------------	(१)

४०)अस्पृशन्नेव - इत्यस्य सन्धिविग्रहं कुरुत | (१)

४१)अप्यासीत् - इत्यस्य सन्धिविग्रहं कुरुत | (१)

४२)यानमार्गः + च - इत्यस्य सन्धिं कुरुत | (१)

४३) 'पाणिः' इत्यस्य उचितं पर्यायपदं चित्वा लिखत | **(१)**

➢ सूत्रम्
➢ हस्तः
➢ पत्रम्
➢ जलम्

४४) ' तटः' इत्यस्य उचितं पर्यायपदं चित्वा लिखत | **(१)**

➢ समयः
➢ तीरम्
➢ वालुका
➢ समुद्रः

schools.aglasem.com

aglasem.com

४५) 'उपकारकः' इत्यस्य उचितं विलोमपदं चित्वा लिखत । **(१)**

- अपकारकः
- महान्
- सुन्दरम्
- अनादरः

४६) ' विपुलम् ' इत्यस्य उचितं विलोमपदं चित्वा लिखत | **(१)**

- लघु
- शीघ्रम्
- चतुरः
- अल्पम्

४७) ' वद्' धातोः क्त्वान्तम् अव्ययं चित्वा लिखत | (१)

- वक्त्वा
- कथयित्वा
- वदित्वा
- उक्त्वा

४८) ' क्रीड्' धातोः तुमन्तम् अव्ययम् चित्वा लिखत | (१)

- क्रीडितुम्
- क्रेतुम्
- कर्तुम्
- कार्यम्

४९)कोष्ठकात् उचितपदानि चित्वा सार्थकवाक्यानि लिखत | **(४)**

ईश्वरः	रुग्णान्	गच्छति	(१)
वैद्याः	पूजां	रक्षति	(१)
अर्चकः	विद्यालयं	करोति	(१)
छात्रः	भक्तान्	चिकित्सन्ति	(१)

schools.aglasem.com

aglasem.com

५०) मञ्जूषायां दत्तपदानां साहाय्येन कथापूर्तिं कृत्वा कथां पुनः लिखत | (४)

(कूपं, बालः, जलकुम्भः, आसीत् सुप्तस्य, आगता, नकुलः, अचिन्तयत्)

एकस्मिन् ग्रामे माधवः नाम जनः--------|तेन तस्य गृहे एकः------पालितः आसीत् | माधवः कार्यार्थं बहिर्गतः आसीत् |तस्य पत्नी मालती जलमानयार्थं --------- गता | जलं स्वीकृत्य सा गृहं प्रति ---------| तदा गृहस्य द्वारे एव सा नकुलम् अपश्यत् | नकुलस्य रक्तरञ्जितं मुखं दृष्ट्वा सा --------- "नकुलेन मम---------- खादितः इति | तदा क्रोधेन तया नकुलस्योपरि---------- क्षिप्तः| तेन सः नकुलः मृत्युं गतः | ततः मालती अन्तः गता |तत्र तया --------- बालकस्य समीपे मारितः सर्पं दृष्टः |

५१)अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत | (४)

- श्रीकृष्णेन शुदर्शनचक्रेण सर्वत्र अन्धकारः कारितः |
- द्रोणाचार्येण शकटव्यूहः रचितः |
- सर्वे सूर्यास्तः सञ्जातः इति अमन्यन्त |
- अभिमन्युवधं श्रुत्वा सर्वे पाण्डवाः शोकमग्नाः अभवन् |
- पाण्डवावीराः अर्जुनप्रतिज्ञां श्रुत्वा उन्निद्राः अभवन् |
- अर्जुनः जयद्रथवधार्थं प्रतिज्ञां कृतवान् |
- युद्धे प्रवर्तमाने जयद्रथः धनुर्धरैः आच्छादितः |
- कौरवाः जयद्रथरक्षणे विचारमग्नाः निद्रां नालभन्त

schools.aglasem.com

५२) मम प्रियः उत्सवः अथवा सुभाषितानि एतयोः कमपि एकं विषयं अधिकृत्य अष्टवाक्यानि लिखत | (४)

अथवा

५२)चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन अष्ट वाक्यानि लिखत| (४)

(बालकः, छत्रम्, वृक्षः, नौका, इन्द्रचापं, जलप्रवाहः, क्रीडति, गृहम्)

====================== समाप्तम् ======================

schools.aglasem.com

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com

aglasem.com